# Dakaradi Durga Sahasranama Stotram

# દકારાદિ દુર્ગાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : durgA dakArAdi sahasranAma stotra

File name : durgadakaradisahasranama.itx

Category : sahasranAma, devii, durgA, stotra, devI

Location : doc_devii

Author : Traditional

Transliterated by : Kirk Wortman kirkwort at hotmail.com, Adwaith Menon adwaithmenon at gmail.com

Proofread by : Kirk Wortman, Ravin Bhalekar ravibhalekar at hotmail.com, Adwaith Menon, KS Ramachandran

Description-comments : kulArNave tantre, Scanned PDF page 263 with some variations

Latest update : August 09, 2006, December 8, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# દકારાદિ દુર્ગાસહસ્રનામસ્તોત્રમ્

॥ શ્રીઃ ॥

॥ શ્રી દુર્ગાયૈ નમઃ ॥

॥ શ્રી દુર્ગા સહસ્રનામ સ્તોત્રમ્ ॥

। અથ દકારાદિદુર્ગાસહસ્રનામસ્તોત્રમ્ ।

શ્રી દેવ્યુવાચ
મમ નામસહસ્રઞ્ચ શિવપૂર્વવિનિર્મિતમ્ ।
તત્પઠ્યતામ્ વિધાનેન તથા સર્વં ભવિશ્યતિ ॥

ઇત્યુક્ત્વા પાર્વતી દેવિ શ્રાવયામાસ તચ્ચ્યતાન્ ।
તદેવ નામસાહસ્રં દકારાદિ વરાનને ॥

રોગદારિદ્ર્યદૌર્ભાગ્યશોકદુઃખવિનાશકમ્ ।
સર્વાસામ્ પૂજિતમ્ નામ શ્રીદુર્ગા દેવતા મતા ॥

નિજબીજમ્ ભવેત્બીજમ્ મન્ત્રં કીલકમુચ્યતે ।
સર્વાશાપૂરણે દેવી વિનિયોગઃ પ્રકીર્તિતઃ ॥

અથ વિનિયોગઃ ।
અસ્ય શ્રીદકારાદિદુર્ગાસહસ્રનામસ્તોત્રસ્ય શ્રીશિવઃ સાક્ષાત્કર્તા ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીદુર્ગા દેવતા । દું બીજમ્ । દું કીલકં ।
દુઃખદારિદ્ર્યદૌર્ભાગ્યરોગશોકનિવૃત્તિપૂર્વકમ્ ।
શ્રીદુર્ગાદેવીપ્રીત્યર્થં ચ પાઠે હવને ચ નામપારાયણે ચ વિનિયોગઃ ।

॥ ધ્યાનમ્ ॥

ૐ હૈં હ્રીં ક્લીં દુમ્ ।
દું દુર્ગા દુર્ગતિહરા દુર્ગાચલનિવાસિની ।
દુર્ગમાર્ગાનુસઞ્ચારા દુર્ગમાર્ગનિવાસિની ॥ ૧॥

દુર્ગમાર્ગપ્રવિષ્ટા ચ દુર્ગમાર્ગપ્રવેશિની ।
દુર્ગમાર્ગકૃતાવાસા દુર્ગમાર્ગજયપ્રિયા ॥ ૨॥

દુર્ગમાર્ગગૃહીતાર્ચા દુર્ગમાર્ગસ્થિતાત્મિકા ।
દુર્ગમાર્ગસ્તુતિપરા દુર્ગમાર્ગસ્મૃતિઃ પરા ॥ ૩॥

દુર્ગમાર્ગસદ્સ્થાલી દુર્ગમાર્ગરતિપ્રિયા ।
દુર્ગમાર્ગસ્થલસ્થાના દુર્ગમાર્ગવિલાસિની ॥ ૪॥

દુર્ગમાર્ગત્યક્તવસ્ત્રા દુર્ગમાર્ગપ્રવર્તિની ।
દુર્ગાસુરનિહન્ત્રી ચ દુર્ગા દુષ્ટનિષૂદિની ॥ ૫॥

દુર્ગાસુરહરાદૂતી દુર્ગાસુરવિનાશિની ।
દુર્ગાસુરવધોન્મત્તા દુર્ગાસુરવધોત્સુકા ॥ ૬॥

દુર્ગાસુરવધોત્સાહા દુર્ગાસુરવધોદ્યતા ।
દુર્ગાસુરવધપ્રેપ્સુર્દુર્ગાસુરમખાન્તકૃત્ ॥ ૭॥

દુર્ગાસુરધ્વંસતોષા દુર્ગદાનવદારિણી ।
દુર્ગવિદ્રાવણકરી દુર્ગવિદ્રાવણી સદા ॥ ૮॥

દુર્ગવિક્ષોભણકરી દુર્ગશીર્ષનિકૃન્તની ।
દુર્ગવિધ્વંસનકરી દુર્ગદૈત્યનિકૃન્તની ॥ ૯॥

દુર્ગદૈત્યપ્રાણહરા દુર્ગદૈત્યાન્તકારિણી ।
દુર્ગદૈત્યહરત્રાતા દુર્ગદૈત્યાસૃગુન્મદા ॥ ૧૦॥

દુર્ગદૈત્યાશનકરી દુર્ગચર્મામ્બરાવૃતા ।
દુર્ગયુદ્ધોત્સવકરી દુર્ગયુદ્ધવિશારદા ॥ ૧૧॥

દુર્ગયુદ્ધાસવરતા દુર્ગયુદ્ધવિમર્દિની ।
દુર્ગયુદ્ધહાસ્યરતા દુર્ગયુદ્ધાટ્ટહાસિની ॥ ૧૨॥

દુર્ગયુદ્ધમહામત્તા દુર્ગયુદ્ધાનુસારિણી ।
દુર્ગયુદ્ધોત્સવોત્સાહા દુર્ગદેશનિષેવિણી ॥ ૧૩॥

દુર્ગદેશવાસરતા દુર્ગદેશવિલાસિની ।
દુર્ગદેશાર્ચનરતા દુર્ગદેશજનપ્રિયા ॥ ૧૪॥

દુર્ગમસ્થાનસંસ્થાના દુર્ગમધ્યાનુસાધના ।
દુર્ગમા દુર્ગમ્ધ્યાના દુર્ગમાત્મસ્વરૂપિણી ॥ ૧૫॥

દુર્ગમાગમસન્ધાના દુર્ગમાગમસંસ્તુતા ।
દુર્ગમાગમદુર્જ્ઞેયા દુર્ગમશ્રુતિસંમતા ॥ ૧૬॥

દુર્ગમશ્રુતિમાન્યા ચ દુર્ગમશ્રુતિપૂજિતા ।
દુર્ગમશ્રુતિસુપ્રીતા દુર્ગમશ્રુતિહર્ષદા ॥ ૧૭॥

દુર્ગમશ્રુતિસંસ્થાના દુર્ગમશ્રુતિમાનિતા ।
દુર્ગમાચારસન્તુષ્ટા દુર્ગમાચારતોષિતા ॥ ૧૮॥

દુર્ગમાચારનિર્વૃત્તા દુર્ગમાચારપૂજિતા ।
દુર્ગમાચારકલિતા દુર્ગમસ્થાનદાયિની ॥ ૧૯॥

દુર્ગમપ્રેમનિરતા દુર્ગમદ્રવિણપ્રદા ।
દુર્ગમામ્બુજમધ્યસ્થા દુર્ગમામ્બુજવાસિની ॥ ૨૦॥

દુર્ગનાડીમાર્ગગતિર્દુર્ગનાડીપ્રચારિણી ।
દુર્ગનાડીપદ્મરતા દુર્ગનાડ્યમ્બુજસ્થિતા ॥ ૨૧॥

દુર્ગનાડીગતાયાતા દુર્ગનાડીકૃતાસ્પદા ।
દુર્ગનાડીરતરતા દુર્ગનાડીશસંસ્તુતા ॥ ૨૨॥

દુર્ગનાડીશ્વરરતા દુર્ગનાડીશચુમ્બિતા ।
દુર્ગનાડીશક્રોડસ્થા દુર્ગનાડ્યત્થિતોત્સુકા ॥ ૨૩॥

દુર્ગનાડ્યારોહણા ચ દુર્ગનાડીનિષેવિતા ।
દરિસ્થાના દરિસ્થાનવાસિની દનુજાન્તકૃત્ ॥ ૨૪॥

દરીકૃતતપસ્યા ચ દરીકૃતહરાર્ચના ।
દરીજાપિતદિષ્ટા ચ દરીકૃતરતિક્રિયા ॥ ૨૫॥

દરીકૃતહરાર્હા ચ દરીક્રીડિતપુત્રિકા ।
દરીસન્દર્શનરતા દરીરોપિતવૃશ્ચિકા ॥ ૨૬॥

દરીગુપ્તિકૌતુકાઢ્યા દરીભ્રમણતત્પરા ।
દનુજાન્તકરી દીના દનુસન્તાનદારિણી ॥ ૨૭॥

દનુજધ્વંસિની દૂના દનુજેન્દ્રવિનાશિની ।
દાનધ્વંસિની દેવી દાનવાનાં ભયઙ્કરી ॥ ૨૮॥

દાનવી દાનવારાધ્યા દાનવેન્દ્રવરપ્રદા ।

દાનવેન્દ્રનિહન્ત્રી ચ દાનવદ્વેષિણી સતી ॥ ૨૯॥

દાનવારિપ્રેમરતા દાનવારિપ્રપૂજિતા ।
દાનવારિકૃતાર્ચા ચ દાનવારિવિભૂતિદા ॥ ૩૦॥

દાનવારિમહાનન્દા દાનવારિરતિપ્રિયા ।
દાનવારિદાનરતા દાનવારિકૃતાસ્પદા ॥ ૩૧॥

દાનવારિસ્તુતિરતા દાનવારિસ્મૃતિપ્રિયા ।
દાનવાર્યાહારરતા દાનવારિપ્રબોધિની ॥ ૩૨॥

દાનવારિધૃતપ્રેમા દુઃખશોકવિમોચિની ।
દુઃખહન્ત્રી દુઃખદાત્રી દુઃખનિર્મૂલકારિણી ॥ ૩૩॥

દુઃખનિર્મૂલનકરી દુઃખદાર્યારિનાશિની ।
દુઃખહરા દુઃખનાશા દુઃખગ્રામા દુરાસદા ॥ ૩૪॥

દુઃખહીના દુઃખધારા દ્રવિણાચારદાયિની ।
દ્રવિણોત્સર્ગસન્તુષ્ટા દ્રવિણત્યાગતોષિકા ॥ ૩૫॥

દ્રવિણસ્પર્શસન્તુષ્ટા દ્રવિણસ્પર્શમાનદા ।
દ્રવિણસ્પર્શહર્ષાઢ્યા દ્રવિણસ્પર્શતુષ્ટિદા ॥ ૩૬॥

દ્રવિણસ્પર્શનકરી દ્રવિણસ્પર્શનાતુરા ।
દ્રવિણસ્પર્શનોત્સાહા દ્રવિણસ્પર્શસાધિકા ॥ ૩૭॥

દ્રવિણસ્પર્શનમતા દ્રવિણસ્પર્શપુત્રિકા ।
દ્રવિણસ્પર્શરક્ષિણી દ્રવિણસ્તોમદાયિની ॥ ૩૮॥

દ્રવિણકર્ષણકરી દ્રવિણૌઘવિસર્જની ।
દ્રવિણાચલદાનાઢ્યા દ્રવિણાચલવાસિની ॥ ૩૯॥

દીનમાતા દીનબન્ધુર્દીનવિઘ્નવિનાશિની ।
દીનસેવ્યા દીનસિદ્ધા દીનસાધ્યા દિગમ્બરી ॥ ૪૦॥

દીનગેહકૃતાનન્દા દીનગેહવિલાસિની ।
દીનભાવપ્રેમરતા દીનભાવવિનોદિની ॥ ૪૧॥

દીનમાનવચેતઃસ્થા દીનમાનવહર્ષદા ।
દીનદૈન્યનિઘાતેચ્છુર્દીનદ્રવિણદાયિની ॥ ૪૨॥

દીનસાધનસન્તુષ્ટા દીનદર્શનદાયિની ।
દીનપુત્રાદિદાત્રી ચ દીનસમ્પદ્વિધાયિની ॥ ૪૩॥

દત્તાત્રેયધ્યાનરતા દત્તાત્રેયપ્રપૂજિતા ।
દત્તાત્રેયર્ષિસંસિદ્ધા દત્તાત્રેયવિભાવિતા ॥ ૪૪॥

દત્તાત્રેયકૃતાર્હા ચ દત્તાત્રેયપ્રસાધિતા ।
દત્તાત્રેયહર્ષદાત્રી દત્તાત્રેયસુખપ્રદા ॥ ૪૫॥

દત્તાત્રેયસ્તુતા ચૈવ દત્તાત્રેયનુતા સદા ।
દત્તાત્રેયપ્રેમરતા દત્તાત્રેયાનુમાનિતા ॥ ૪૬॥

દત્તાત્રેયસમુદ્ગીતા દત્તાત્રેયકુટુમ્બિની ।
દત્તાત્રેયપ્રાણતુલ્યા દત્તાત્રેયશરીરિણી ॥ ૪૭॥

દત્તાત્રેયકૃતાનન્દા દત્તાત્રેયાંશસમ્ભવા ।
દત્તાત્રેયવિભૂતિસ્થા દત્તાત્રેયાનુસારિણી ॥ ૪૮॥

દત્તાત્રેયગીતિરતા દત્તાત્રેયધનપ્રદા ।
દત્તાત્રેયદુઃખહરા દત્તાત્રેયવરપ્રદા ॥ ૪૯॥

દત્તાત્રેયજ્ઞાનદાત્રી દત્તાત્રેયભયાપહા ।
દેવકન્યા દેવમાન્યા દેવદુઃખવિનાશિની ॥ ૫૦॥

દેવસિદ્ધા દેવપૂજ્યા દેવેજ્યા દેવવન્દિતા ।
દેવમાન્યા દેવધન્યા દેવવિઘ્નવિનાશિની ॥ ૫૧॥

દેવરમ્યા દેવરતા દેવકૌતુકતત્પરા ।
દેવક્રીડા દેવવ્રીડા દેવવૈરિવિનાશિની ॥ ૫૨॥

દેવકામા દેવરામા દેવદ્વિષ્ટવિનાશિની ।
દેવદેવપ્રિયા દેવી દેવદાનવવન્દિતા ॥ ૫૩॥

દેવદેવરતાનન્દા દેવદેવવરોત્સુકા ।
દેવદેવપ્રેમરતા દેવદેવપ્રિયંવદા ॥ ૫૪॥

દેવદેવપ્રાણતુલ્યા દેવદેવનિતમ્બિની ।
દેવદેવહૃતમના દેવદેવસુખાવહા ॥ ૫૫॥

દેવદેવક્રોડરતા દેવદેવસુખપ્રદા ।
દેવદેવમહાનન્દા દેવદેવપ્રચુમ્બિતા ॥ ૫૬॥

દેવદેવોપભુક્તા ચ દેવદેવાનુસેવિતા ।
દેવદેવગતપ્રાણા દેવદેવગતાત્મિકા ॥ ૫૭॥

દેવદેવહર્ષદાત્રી દેવદેવસુખપ્રદા ।
દેવદેવમહાનન્દા દેવદેવવિલાસિની ॥ ૫૮॥

દેવદેવધર્મપત્ની દેવદેવમનોગતા ।
દેવદેવવધૂર્દેવી દેવદેવાર્ચનપ્રિયા ॥ ૫૯॥

દેવદેવાઙ્ગનિલયા દેવદેવાઙ્ગશાયિની ।
દેવદેવાઙ્ગસુખિની દેવદેવાઙ્ગવાસિની ॥ ૬૦॥

દેવદેવાઙ્ગભૂષા ચ દેવદેવાઙ્ગભૂષણા ।
દેવદેવપ્રિયકરી દેવદેવાપ્રિયાન્તકૃત્ ॥ ૬૧॥

દેવદેવપ્રિયપ્રાણા દેવદેવપ્રિયાત્મિકા ।
દેવદેવાર્ચકપ્રાણા દેવદેવાર્ચકપ્રિયા ॥ ૬૨॥

દેવદેવાર્ચકોત્સાહા દેવદેવાર્ચકાશ્રયા ।
દેવદેવાર્ચકાવિઘ્ના દેવદેવપ્રસૂરપિ ॥ ૬૩॥

દેવદેવસ્ય જનની દેવદેવવિધાયિની ।
દેવદેવસ્ય રમણી દેવદેવહૃદાશ્રયા ॥ ૬૪॥

દેવદેવેષ્ટદેવી ચ દેવતાપસપાતિની ।
દેવતાભાવસન્તુષ્ટા દેવતાભાવતોષિતા ॥ ૬૫॥

દેવતાભાવવરદા દેવતાભાવસિદ્ધિદા ।
દેવતાભાવસંસિદ્ધા દેવતાભાવસમ્ભવા ॥ ૬૬॥

દેવતાભાવસુખિની દેવતાભાવવન્દિતા ।
દેવતાભાવસુપ્રીતા દેવતાભાવહર્ષદા ॥ ૬૭॥

દેવતાવિઘ્નહન્ત્રી ચ દેવતાદ્વિષ્ટનાશિની ।
દેવતાપૂજિતપદા દેવતાપ્રેમતોષિતા ॥ ૬૮॥

દેવતાગારનિલયા દેવતાસૌખ્યદાયિની ।
દેવતાનિજભાવા ચ દેવતાહૃતમાનસા ॥ ૬૯॥

દેવતાકૃતપાદાર્ચા દેવતાહૃતભક્તિકા ।

દેવતાગર્વમધ્યસ્થા દેવતાદેવતાતનુઃ ॥ ૭૦॥

દું દુર્ગાયૈ નમો નામ્ની દુમ્ફણ્મન્ત્રસ્વરૂપિણી ।
દૂં નમો મન્ત્રરૂપા ચ દૂં નમો મૂર્તિકાત્મિકા ॥ ૭૧॥

દૂરદર્શિપ્રિયા દુષ્ટા દુષ્તભૂતનિષેવિતા ।
દૂરદર્શિપ્રેમરતા દૂરદર્શિપ્રિયંવદા ॥ ૭૨॥

દૂરદર્શિસિદ્ધિદાત્રી દૂરદર્શિપ્રતોષિતા ।
દૂરદર્શિકણ્ઠસંસ્થા દૂરદર્શિપ્રહર્ષિતા ॥ ૭૩॥

દૂરદર્શિગૃહીતાર્ચા દૂરદર્શિપ્રતર્ષિતા ।
દૂરદર્શિપ્રાણતુલ્યા દૂરદર્શિસુખપ્રદા ॥ ૭૪॥

દૂરદર્શિભ્રાન્તિહરા દૂરદર્શિહૃદાસ્પદા ।
દૂરદર્શ્યરિવિદ્ભાવા દીર્ઘદર્શિપ્રમોદિની ॥ ૭૫॥

દીર્ઘદર્શિપ્રાણતુલ્યા દૂરદર્શિવરપ્રદા ।
દીર્ઘદર્શિહર્ષદાત્રી દીર્ઘદર્શિપ્રહર્ષિતા ॥ ૭૬॥

દીર્ઘદર્શિમહાનન્દા દીર્ઘદર્શિગૃહાલયા ।
દીર્ઘદર્શિગૃહીતાર્ચા દીર્ઘદર્શિહૃતાર્હણા ॥ ૭૭॥

દયા દાનવતી દાત્રી દયાલુર્દીનવત્સલા ।
દયાર્દ્રા ચ દયાશીલા દયાઢ્યા ચ દયાત્મિકા ॥ ૭૮॥

દયા દાનવતી દાત્રી દયાલુર્દીનવત્સલા ।
દયાર્દ્રા ચ દયાશીલા દયાઢ્યા ચ દયાત્મિકા ॥ ૭૯॥

દયામ્બુધિર્દયાસારા દયાસાગરપારગા ।
દયાસિન્ધુર્દયાભારા દયાવત્કરુણાકરી ॥ ૮૦॥

દયાવદ્વત્સલા દેવી દયાદાનરતા સદા ।
દયાવદ્ભક્તિસુખિની દયાવત્પરિતોષિતા ॥ ૮૧॥

દયાવત્સ્નેહનિરતા દયાવત્પ્રતિપાદિકા ।
દયાવત્પ્રાણકર્ત્રી ચ દયાવન્મુક્તિદાયિની ॥ ૮૨॥

દયાવદ્ભાવસન્તુષ્ટા દયાવત્પરિતોષિતા ।
દયાવત્તારણપરા દયાવત્સિદ્ધિદાયિની ॥ ૮૩॥

દયાવત્પુત્રવદ્ભાવા દયાવત્પુત્રરૂપિણી ।
દયાવદ્દેહનિલયા દયાબન્ધુર્દયાશ્રયા ॥ ૮૪॥

દયાલુવાત્સલ્યકરી દયાલુસિદ્ધિદાયિની ।
દયાલુશરણાસક્તા દયાલુર્દેહમન્દિરા ॥ ૮૫॥

દયાલુભક્તિભાવસ્થા દયાલુપ્રાણરૂપિણી ।
દયાલુસુખદા દમ્ભા દયાલુપ્રેમવર્ષિણી ॥ ૮૬॥

દયાલુવશગા દીર્ઘા દીર્ઘાઙ્ગી દીર્ઘલોચના ।
દીર્ઘનેત્રા દીર્ઘચક્ષુર્દીર્ઘબાહુલતાત્મિકા ॥ ૮૭॥

દીર્ઘકેશી દીર્ઘમુખી દીર્ઘઘોણા ચ દારુણા ।
દારુણાસુરહન્ત્રી ચ દારુણાસુરદારિણી ॥ ૮૮॥

દારુણાહવકર્ત્રી ચ દારુણાહવહર્ષિતા ।
દારુણાહવહોમાઢ્યા દારુણાચલનાશિની ॥ ૮૯॥

દારુણાચારનિરતા દારુણોત્સવહર્ષિતા ।
દારુણોદ્યતરૂપા ચ દારુણારિનિવારિણી ॥ ૯૦॥

દારુણેક્ષણસંયુક્તા દોશ્ચતુષ્કવિરાજિતા ।
દશદોષ્કા દશભુજા દશબાહુવિરાજિતા ॥ ૯૧॥

દશાસ્ત્રધારિણી દેવી દશદિક્ખ્યાતવિક્રમા ।
દશરથાર્ચિતપદા દાશરથિપ્રિયા સદા ॥ ૯૨॥

દાશરથિપ્રેમતુષ્ટા દાશરથિરતિપ્રિયા ।
દાશરથિપ્રિયકરી દાશરથિપ્રિયંવદા ॥ ૯૩॥

દાશરથીષ્ટસન્દાત્રી દાશરથીષ્ટદેવતા ।
દાશરથિદ્વેષિનાશા દાશરથ્યાનુકૂલ્યદા ॥ ૯૪॥

દાશરથિપ્રિયતમા દાશરથિપ્રપૂજિતા ।
દશાનનારિસમ્પૂજ્યા દશાનનારિદેવતા ॥ ૯૫॥

દશાનનારિપ્રમદા દશાનનારિજન્મભૂઃ ।
દશાનનારિરતિદા દશાનનારિસેવિતા ॥ ૯૬॥

દશાનનારિસુખદા દશાનનારિવૈરિહૃત્ ।
દશાનનારીષ્ટદેવી દશગ્રીવારિવન્દિતા ॥ ૯૭॥

દશગ્રીવારિજનની દશગ્રીવારિભાવિની ।
દશગ્રીવારિસહિતા દશગ્રીવસભાજિતા ॥ ૯૮ ॥

દશગ્રીવારિરમણી દશગ્રીવવધૂરપિ ।
દશગ્રીવનાશકર્ત્રી દશગ્રીવવરપ્રદા ॥ ૯૯ ॥

દશગ્રીવપુરસ્થા ચ દશગ્રીવવધોત્સુકા ।
દશગ્રીવપ્રીતિદાત્રી દશગ્રીવવિનાશિની ॥ ૧૦૦ ॥

દશગ્રીવાહવકરી દશગ્રીવાનપાયિની ।
દશગ્રીવપ્રિયા વન્દ્યા દશગ્રીવહૃતા તથા ॥ ૧૦૧ ॥

દશગ્રીવાહિતકરી દશગ્રીવેશ્વરપ્રિયા ।
દશગ્રીવેશ્વરપ્રાણા દશગ્રીવવરપ્રદા ॥ ૧૦૨ ॥

દશગ્રીવેશ્વરરતા દશવર્ષીયકન્યકા ।
દશવર્ષીયબાલા ચ દશવર્ષીયવાસિની ॥ ૧૦૩ ॥

દશપાપહરા દમ્યા દશહસ્તવિભૂષિતા ।
દશશસ્ત્રલસદ્દોષ્કા દશદિક્પાલવન્દિતા ॥ ૧૦૪ ॥

દશાવતારરૂપા ચ દશાવતારરૂપિણી ।
દશવિદ્યાભિન્નદેવી દશપ્રાણસ્વરૂપિણી ॥ ૧૦૫ ॥

દશવિદ્યાસ્વરૂપા ચ દશવિદ્યામયી તથા ।
દૃક્સ્વરૂપા દૃક્પ્રદાત્રી દૃગ્રૂપા દૃક્પ્રકાશિની ॥ ૧૦૬ ॥

દિગન્તરા દિગન્તસ્થા દિગમ્બરવિલાસિની ।
દિગમ્બરસમાજસ્થા દિગમ્બરપ્રપૂજિતા ॥ ૧૦૭ ॥

દિગમ્બરસહચરી દિગમ્બરકૃતાસ્પદા ।
દિગમ્બરહૃતાચિત્તા દિગમ્બરકથાપ્રિયા ॥ ૧૦૮ ॥

દિગમ્બરગુણરતા દિગમ્બરસ્વરૂપિણી ।
દિગમ્બરશિરોધાર્યા દિગમ્બરહૃતાશ્રયા ॥ ૧૦૯ ॥

દિગમ્બરપ્રેમરતા દિગમ્બરરતાતુરા ।
દિગમ્બરીસ્વરૂપા ચ દિગમ્બરીગણાર્ચિતા ॥ ૧૧૦ ॥

દિગમ્બરીગણપ્રાણા દિગમ્બરીગણપ્રિયા ।

દિગમ્બરીગણારાધ્યા દિગમ્બરગણેશ્વરા ॥ ૧૧૧॥

દિગમ્બરગણસ્પર્શા મદિરાપાનવિહ્વલા ।
દિગમ્બરીકોટિવૃતા દિગમ્બરીગણાવૃતા ॥ ૧૧૨॥

દુરન્તા દુષ્કૃતિહરા દુર્ધ્યેયા દુરતિક્રમા ।
દુરન્તદાનવદ્વેષ્ટી દુરન્તદનુજાન્તકૃત્ ॥ ૧૧૩॥

દુરન્તપાપહન્ત્રી ચ દસ્રનિસ્તારકારિણી ।
દસ્રમાનસસંસ્થાના દસ્રજ્ઞાનવિવર્ધિની ॥ ૧૧૪॥

દસ્રસમ્ભોગજનની દસ્રસમ્ભોગદાયિની ।
દસ્રસમ્ભોગભવના દસ્રવિદ્યાવિધાયિની ॥ ૧૧૫॥

દસ્રોદ્વેગહરા દસ્રજનની દસ્રસુન્દરી ।
દસ્રભક્તિવિધાજ્ઞાના દસ્રદ્વિષ્ટવિનાશિની ॥ ૧૧૬॥

દસ્રાપકારદમની દસ્રસિદ્ધિવિધાયિની ।
દસ્રતારારાધિકા ચ દસ્રમાતૃપ્રપૂજિતા ॥ ૧૧૭॥

દસ્રદૈન્યહરા ચૈવ દસ્રતાતનિષેવિતા ।
દસ્રપિતૃશયજ્યોતિર્દસ્રકૌશલદાયિની ॥ ૧૧૮॥

દશશીર્ષારિસહિતા દશશીર્ષારિકામિની ।
દશશીર્ષપુરી દેવી દશશીર્ષસભાજિતા ॥ ૧૧૯॥

દશશીર્ષારિસુપ્રીતા દશશીર્ષવધૂપ્રિયા ।
દશશીર્ષશિરશ્છેત્રી દશશીર્ષનિતમ્બિની ॥ ૧૨૦॥

દશશીર્ષહરપ્રાણા દશશીર્ષહરાત્મિકા ।
દશશીર્ષહરારાધ્યા દશશીર્ષારિવન્દિતા ॥ ૧૨૧॥

દશશીર્ષારિસુખદા દશશીર્ષકપાલિની ।
દશશીર્ષજ્ઞાનદાત્રી દશશીર્ષારિદેહિની ॥ ૧૨૨॥

દશશીર્ષવધોપાત્તશ્રીરામચન્દ્રરૂપતા ।
દશશીર્ષરાષ્ટ્રદેવી દશશીર્ષારિસારિણી ॥ ૧૨૩॥

દશશીર્ષભ્રાતૃતુષ્ટા દશશીર્ષવધૂપ્રિયા ।
દશશીર્ષવધૂપ્રાણા દશશીર્ષવધૂરતા ॥ ૧૨૪॥

દૈત્યગુરુરતા સાધ્વી દૈત્યગુરુપ્રપૂજિતા ।
દૈત્યગુરુપદેષ્ટી ચ દૈત્યગુરુનિષેવિતા ॥ ૧૨૫॥

દૈત્યગુરુમતપ્રાણા દૈત્યગુર્ત્તાપનાશિની ।
દુરન્તદુઃખશમની દુરન્તદમની તમી ॥ ૧૨૬॥

દુરન્તશોકશમની દુરન્તરોગનાશિની ।
દુરન્તવૈરિદમની દુરન્તદૈત્યનાશિની ॥ ૧૨૭॥

દુરન્તકલુષઘ્ની ચ દુષ્કૃતિસ્તોમનાશિની ।
દુરાશયા દુરાધારા દુર્જયા દુષ્ટકામિની ॥ ૧૨૮॥

દર્શનીયા ચ દૃશ્યા ચાઽદૃશ્યા ચ દૃષ્ટિગોચરા ।
દૂતીયાગપ્રિયા દૂતી દૂતીયાગકરપ્રિયા ॥ ૧૨૯॥

દૂતીયાગકરાનન્દા દૂતીયાગસુખપ્રદા ।
દૂતીયાગકરાયાતા દૂતીયાગપ્રમોદિની ॥ ૧૩૦॥

દુર્વાસઃપૂજિતા ચૈવ દુર્વાસોમુનિભાવિતા ।
દુર્વાસોઽર્ચિતપાદા ચ દુર્વાસોમૌનભાવિતા ॥ ૧૩૧॥

દુર્વાસોમુનિવન્દ્યા ચ દુર્વાસોમુનિદેવતા ।
દુર્વાસોમુનિમાતા ચ દુર્વાસોમુનિસિદ્ધિજા ॥ ૧૩૨॥

દુર્વાસોમુનિભાવસ્થા દુર્વાસોમુનિસેવિતા ।
દુર્વાસોમુનિચિત્તસ્થા દુર્વાસોમુનિમણ્ડિતા ॥ ૧૩૩॥

દુર્વાસોમુનિસઞ્ચારા દુર્વાસોહૃદયઙ્ગમા ।
દુર્વાસોહૃદયારાધ્યા દુર્વાસોહૃત્સરોજગા ॥ ૧૩૪॥

દુર્વાસસ્તાપસારાધ્યા દુર્વાસસ્તાપસાશ્રયા ।
દુર્વાસસ્તાપસરતા દુર્વાસસ્તાપસેશ્વરી ॥ ૧૩૫॥

દુર્વાસોમુનિકન્યા ચ દુર્વાસોઽદ્ભુતસિદ્ધિદા ।
દરરાત્રી દરહરા દરયુક્તા દરાપહા ॥ ૧૩૬॥

દરઘ્ની દરહન્ત્રી ચ દરયુક્તા દરાશ્રયા ।
દરસ્મેરા દરાપાઙ્ગી દયાદાત્રી દયાશ્રયા ।
દસ્રપૂજ્યા દસ્રમાતા દસ્રદેવી દુરોન્મદા ॥ ૧૩૭॥

દસ્રસિદ્ધા દસ્રસંસ્થા દસ્રતાપવિમોચિની ।

દસ્રક્ષોભહરા નિત્યા દસ્રલોકગતાત્મિકા ॥ ૧૩૮॥

દૈત્યગુર્વઙ્ગનાવન્દ્યાં દૈત્યગુર્વઙ્ગનાપ્રિયા ।
દૈત્યગુર્વઙ્ગનાસિધ્દ્ધા દૈત્યગુર્વઙ્ગનોત્સુકા ॥ ૧૩૯॥

દૈત્યગુરુપ્રિયતમા દેવગુરુનિષેવિતા ।
દેવગુરુપ્રસૂરૂપા દેવગુરુકૃતાર્હણા ॥ ૧૪૦॥

દેવગુરુપ્રેમયુતા દેવગુર્વનુમાનિતા ।
દેવગુરુપ્રભાવજ્ઞા દેવગુરુસુખપ્રદા ॥ ૧૪૧॥

દેવગુરુજ્ઞાનદાત્રી દેવગુરુપ્રમોદિની ।
દૈત્યસ્ત્રીગણસમ્પૂજ્યા દૈત્યસ્ત્રીગણપૂજિતા ॥ ૧૪૨॥

દૈત્યસ્ત્રીગણરૂપા ચ દૈત્યસ્ત્રીચિત્તહારિણી ।
દૈત્યસ્ત્રીગણપૂજ્યા ચ દૈત્યસ્ત્રીગણવન્દિતા ॥ ૧૪૩॥

દૈત્યસ્ત્રીગણચિત્તસ્થા દેવસ્ત્રીગણભૂષિતા ।
દેવસ્ત્રીગણસંસિધ્દ્ધા દેવસ્ત્રીગણતોષિતા ॥ ૧૪૪॥

દેવસ્ત્રીગણહસ્તસ્થચારુચામરવીજિતા ।
દેવસ્ત્રીગણહસ્તસ્થચારુગન્ધવિલેપિતા ॥ ૧૪૫॥

દેવાઙ્ગનાધૃતાદર્શદૃષ્ટ્યર્થમુખચન્દ્રમા ।
દેવાઙ્ગનોત્સૃષ્ટનાગવલ્લીદલકૃતોત્સુકા ॥ ૧૪૬॥

દેવસ્ત્રીગણહસ્તસ્થદીપમાલાવિલોકના ।
દેવસ્ત્રીગણહસ્તસ્થધૂપઘ્રાણવિનોદિની ॥ ૧૪૭॥

દેવનારીકરગતવાસકાસવપાયિની ।
દેવનારીકઙ્કતિકાકૃતકેશનિમાર્જના ॥ ૧૪૮॥

દેવનારીસેવ્યગાત્રા દેવનારીકૃતોત્સુકા ।
દેવનારીવિરચિતપુષ્પમાલાવિરાજિતા ॥ ૧૪૯॥

દેવનારીવિચિત્રાઙ્ગી દેવસ્ત્રીદત્તભોજના ।
દેવસ્ત્રીગણગીતા ચ દેવસ્ત્રીગીતસોત્સુકા ॥ ૧૫૦॥

દેવસ્ત્રીનૃત્યસુખિની દેવસ્ત્રીનૃત્યદર્શિની ।
દેવસ્ત્રીયોજિતલસદ્રત્નપાદપદામ્બુજા ॥ ૧૫૧॥

દેવસ્ત્રીગણવિસ્તીર્ણચારુતલ્પનિષેદુષી ।
દેવનારીચારુકરાકલિતાઙ્ઘ્ર્યાદિદેહિકા ॥ ૧૫૨॥

દેવનારીકરવ્યગ્રતાલવૃન્દમરુત્સુકા ।
દેવનારીવેણુવીણાનાદસોત્કણ્ઠમાનસા ॥ ૧૫૩॥

દેવકોટિસ્તુતિનુતા દેવકોટિકૃતાર્હણા ।
દેવકોટિગીતગુણા દેવકોટિકૃતસ્તુતિઃ ॥ ૧૫૪॥

દન્તદષ્ટ્યોદ્વેગફલા દેવકોલાહલાકુલા ।
દ્વેષરાગપરિત્યક્તા દ્વેષરાગવિવર્જિતા ॥ ૧૫૫॥

દામપૂજ્યા દામભૂષા દામોદરવિલાસિની ।
દામોદરપ્રેમરતા દામોદરભગિન્યપિ ॥ ૧૫૬॥

દામોદરપ્રસૂર્દામોદરપત્નીપતિવ્રતા ।
દામોદરાઽભિન્નદેહા દામોદરરતિપ્રિયા ॥ ૧૫૭॥

દામોદરાભિન્નતનુર્દામોદરકૃતાસ્પદા ।
દામોદરકૃતપ્રાણા દામોદરગતાત્મિકા ॥ ૧૫૮॥

દામોદરકૌતુકાઢ્યા દામોદરકલાકલા ।
દામોદરાલિઙ્ગિતાઙ્ગી દામોદરકુતૂહલા ॥ ૧૫૯॥

દામોદરકૃતાહ્લાદા દામોદરસુચુમ્બિતા ।
દામોદરસુતાકૃષ્ટા દામોદરસુખપ્રદા ॥ ૧૬૦॥

દામોદરસહાઢ્યા ચ દામોદરસહાયિની ।
દામોદરગુણજ્ઞા ચ દામોદરવરપ્રદા ॥ ૧૬૧॥

દામોદરાનુકૂલા ચ દામોદરનિતમ્બિની ।
દામોદરબલક્રીડાકુશલા દર્શનપ્રિયા ॥ ૧૬૨॥

દામોદરજલક્રીડાત્યક્તસ્વજનસૌહૃદા ।
દામોદરલસદ્રાસકેલિકૌતુકિની તથા ॥ ૧૬૩॥

દામોદરભ્રાતૃકા ચ દામોદરપરાયણા ।
દામોદરધરા દામોદરવૈરવિનાશિની ॥ ૧૬૪॥

દામોદરોપજાયા ચ દામોદરનિમન્ત્રિતા ।
દામોદરપરાભૂતા દામોદરપરાજિતા ॥ ૧૬૫॥

દામોદરસમાક્રાન્તા દામોદરહતાશુભા ।
દામોદરોત્સવરતા દામોદરોત્સવાવહા ॥ ૧૬૬॥

દામોદરસ્તન્યદાત્રી દામોદરગવેષિતા ।
દમયન્તીસિદ્ધિદાત્રી દમયન્તીપ્રસાધિતા ॥ ૧૬૭॥

દમયન્તીષ્ટદેવી ચ દમયન્તીસ્વરૂપિણી ।
દમયન્તીકૃતાર્ચા ચ દમનર્ષિવિભાવિતા ॥ ૧૬૮॥

દમનર્ષિપ્રાણતુલ્યા દમનર્ષિસ્વરૂપિણી ।
દમનર્ષિસ્વરૂપા ચ દમ્ભપૂરિતવિગ્રહા ॥ ૧૬૯॥

દમ્ભહન્ત્રી દમ્ભધાત્રી દમ્ભલોકવિમોહિની ।
દમ્ભશીલા દમ્ભહરા દમ્ભવત્પરિમર્દિની ॥ ૧૭૦॥

દમ્ભરૂપા દમ્ભકરી દમ્ભસન્તાનદારિણી ।
દત્તમોક્ષા દત્તધના દત્તારોગ્યા ચ દામ્ભિકા ॥ ૧૭૧॥

દત્તપુત્રા દત્તદારા દત્તહારા ચ દારિકા ।
દત્તભોગા દત્તશોકા દત્તહસ્ત્યાદિવાહના ॥ ૧૭૨॥

દત્તમતિર્દત્તભાર્યા દત્તશાસ્ત્રાવબોધિકા ।
દત્તપાના દત્તદાના દત્તદારિદ્ર્યનાશિની ॥ ૧૭૩॥

દત્તસોધાવનીવાસા દત્તસ્વર્ગા ચ દાસદા ।
દાસ્યતુષ્ટા દાસ્યહરા દાસદાસીશતપ્રભા ॥ ૧૭૪॥

દારરૂપા દારવાસા દારવાસિહૃદાસ્પદા ।
દારવાસિજનારાધ્યા દારવાસિજનપ્રિયા ॥ ૧૭૫॥

દારવાસિવિનિર્નીતા દારવાસિસમર્ચિતા ।
દારવાસ્યાહૃતપ્રાણા દારવાસ્યરિનાશિની ॥ ૧૭૬॥

દારવાસિવિઘ્નહરા દારવાસિવિમુક્તિદા ।
દારાગ્નિરૂપિણી દારા દારકાર્યરિનાશિની ॥ ૧૭૭॥

દમ્પતી દમ્પતીષ્ટા ચ દમ્પતીપ્રાણરૂપિકા ।
દમ્પતીસ્નેહનિરતા દામ્પત્યસાધનપ્રિયા ॥ ૧૭૮॥

દામ્પત્યસુખસેના ચ દામ્પત્યસુખદાયિની ।

દમ્પત્યચારનિરતા દમ્પત્યામોદમોદિતા ॥ ૧૭૯॥

દમ્પત્યામોદસુખિની દામ્પત્યાહ્લાદકારિણી ।
દમ્પતીષ્ટપાદપદ્મા દામ્પત્યપ્રેમરૂપિણી ॥ ૧૮૦॥

દામ્પત્યભોગભવના દાડિમીફલભોજિની ।
દાડિમીફલસન્તુષ્ટા દાડિમીફલમાનસા ॥ ૧૮૧॥

દાડિમીવૃહ્યસંસ્થાના દાડિમીવૃક્ષવાસિની ।
દાડિમીવૃક્ષરૂપા ચ દાડિમીવનવાસિની ॥ ૧૮૨॥

દાડિમીફલસામ્યોરુપયોધરસમન્વિતા ।
દક્ષિણા દક્ષિણારૂપા દક્ષિણારૂપધારિણી ॥ ૧૮૩॥

દક્ષકન્યા દક્ષપુત્રી દક્ષમાતા ચ દક્ષસૂઃ ।
દક્ષગોત્રા દક્ષસુતા દક્ષયજ્ઞવિનાશિની ॥ ૧૮૪॥

દક્ષયજ્ઞનાશકર્ત્રી દક્ષયજ્ઞાન્તકારિણી ।
દક્ષપ્રસૂતિર્દક્ષેજ્યા દક્ષવંશૈકપાવની ॥ ૧૮૫॥

દક્ષાત્મજા દક્ષસૂનુર્દક્ષજા દક્ષજાતિકા ।
દક્ષજન્મા દક્ષજનુર્દક્ષદેહસમુદ્ભવા ॥ ૧૮૬॥

દક્ષજનિર્દક્ષયાગધ્વંસિની દક્ષકન્યકા ।
દક્ષિણાચારનિરતા દક્ષિણાચારતુષ્ટિદા ॥ ૧૮૭॥

દક્ષિણાચારસંસિધ્દા દક્ષિણાચારભાવિતા ।
દક્ષિણાચારસુખિની દક્ષિણાચારસાધિતા ॥ ૧૮૮॥

દક્ષિણાચારમોક્ષાપ્તિર્દક્ષિણાચારવન્દિતા ।
દક્ષિણાચારશરણા દક્ષિણાચારહર્ષિતા ॥ ૧૮૯॥

દ્વારપાલપ્રિયા દ્વારવાસિની દ્વારસંસ્થિતા ।
દ્વારરૂપા દ્વારસંસ્થા દ્વારદેશનિવાસિની ॥ ૧૯૦॥

દ્વારકરી દ્વારધાત્રી દોષમાત્રવિવર્જિતા ।
દોષાકરા દોષહરા દોષરાશિવિનાશિની ॥ ૧૯૧॥

દોષાકરવિભૂષાઢ્યા દોષાકરકપાલિની ।
દોષાકરસહસ્રાભા દોષાકરસમાનના ॥ ૧૯૨॥

દોષાકરમુખી દિવ્યા દોષાકરકરાગ્રજા ।
દોષાકરસમજ્યોતિર્દોષાકરસુશીતલા ॥ ૧૯૩॥

દોષાકરશ્રેણી દોષસદૃશાપાઙ્ગવીક્ષણા ।
દોષાકરેષ્ટદેવી ચ દોષાકરનિષેવિતા ॥ ૧૯૪॥

દોષાકરપ્રાણરૂપા દોષાકરમરીચિકા ।
દોષાકરોલ્લસદ્ભાલા દોષાકરસુહર્ષિણી ॥ ૧૯૫॥

દોષાકરશિરોભૂષા દોષાકરવધૂપ્રિયા ।
દોષાકરવધૂપ્રાણા દોષાકરવધૂમતા ॥ ૧૯૬॥

દોષાકરવધૂપ્રીતા દોષાકરવધૂરપિ ।
દોષાપૂજ્યા તથા દોષાપૂજિતા દોષહારિણી ॥ ૧૯૭॥

દોષાજાપમહાનન્દા દોષાજાપપરાયણા ।
દોષાપુરશ્ચારરતા દોષાપૂજકપુત્રિણી ॥ ૧૯૮॥

દોષાપૂજકવાત્સલ્યકારિણી જગદમ્બિકા ।
દોષાપૂજકવૈરઘ્ની દોષાપૂજકવિઘ્નહૃત્ ॥ ૧૯૯॥

દોષાપૂજકસન્તુષ્ટા દોષાપૂજકમુક્તિદા ।
દમપ્રસૂનસમ્પૂજ્યા દમપુષ્પપ્રિયા સદા ॥ ૨૦૦॥

દુર્યોધનપ્રપૂજ્યા ચ દુઃશાસનસમર્ચિતા ।
દણ્ડપાણિપ્રિયાદણ્ડપાણિમાતા દયાનિધિઃ ॥ ૨૦૧॥

દણ્ડપાણિસમારાધ્યા દણ્ડપાણિપ્રપૂજિતા ।
દણ્ડપાણિગૃહાસક્તા દણ્ડપાણિપ્રિયંવદા ॥ ૨૦૨॥

દણ્ડપાણિપ્રિયતમા દણ્ડપાણિમનોહરા ।
દણ્ડપાણિહૃતપ્રાણા દણ્ડપાણિસુસિદ્ધિદા ॥ ૨૦૩॥

દણ્ડપાણિપરામૃષ્ટા દણ્ડપાણિપ્રહર્ષિતા ।
દણ્ડપાણિવિઘ્નહરા દણ્ડપાણિશિરોધૃતા ॥ ૨૦૪॥

દણ્ડપાણિપ્રાપ્તચર્ચા દણ્ડપાણ્યુન્મુખી સદા ।
દણ્ડપાણિપ્રાપ્તપદા દણ્ડપાણિવરોન્મુખી ॥ ૨૦૫॥

દણ્ડહસ્તા દણ્ડપાણિર્દણ્ડબાહુર્દરાન્તકૃત્ ।
દણ્ડદોષ્કા દણ્ડકરા દણ્ડચિત્તકૃતાસ્પદા ॥ ૨૦૬॥

દણ્ડિવિદ્યા દણ્ડિમાતા દણ્ડિખણ્ડકનાશિની ।
દણ્ડિપ્રિયા દણ્ડિપૂજ્યા દણ્ડિસન્તોષદાયિની ॥ ૨૦૭॥

દસ્યુપૂજા દસ્યુરતા દસ્યુદ્રવિણદાયિની ।
દસ્યુવર્ગકૃતાર્હા ચ દસ્યુવર્ગવિનાશિની ॥ ૨૦૮॥

દસ્યુનિર્ણાશિની દસ્યુકુલનિર્ણાશિની તથા ।
દસ્યુપ્રિયકરી દસ્યુનૃત્યદર્શનતત્પરા ॥ ૨૦૯॥

દુષ્ટદણ્ડકરી દુષ્ટવર્ગવિદ્રાવિણી તથા ।
દુષ્ટવર્ગનિગ્રહાર્હા દૂષકપ્રાણનાશિની ॥ ૨૧૦॥

દૂષકોત્તાપજનની દૂષકારિષ્ટકારિણી ।
દૂષકદ્વેષણકરી દાહિકા દહનાત્મિકા ॥ ૨૧૧॥

દારુકારિનિહન્ત્રી ચ દારુકેશ્વરપૂજિતા ।
દારુકેશ્વરમાતા ચ દારુકેશ્વરવન્દિતા ॥ ૨૧૨॥

દર્ભહસ્તા દર્ભયુતા દર્ભકર્મવિવર્જિતા ।
દર્ભમયી દર્ભતનુર્ દર્ભસર્વસ્વરૂપિણી ॥ ૨૧૩॥

દર્ભકર્માચારુરતા દર્ભહસ્તકૃતાર્હણા ।
દર્ભાનુકૂલા દમ્ભર્યા દર્વીપાત્રાનુદામિની ॥ ૨૧૪॥

દમઘોષપ્રપૂજ્યા ચ દમઘોષવરપ્રદા ।
દમઘોષસમારાધ્યા દાવાગ્નિરૂપિણી તથા ॥ ૨૧૫॥

દાવાગ્નિરૂપા દાવાગ્નિનિર્ણાશિતમહાબલા ।
દન્તદંષ્ટ્રાસુરકલા દન્તચર્ચિતહસ્તિકા ॥ ૨૧૬॥

દન્તદંષ્ટ્રસ્યન્દના ચ દન્તનિર્ણાશિતાસુરા ।
દધિપૂજ્ય દધિપ્રીતા દધીચિવરદાયિની ॥ ૨૧૭॥

દધીચીષ્ટદેવતા ચ દધીચિમોક્ષદાયિની ।
દધીચિદૈન્યહન્ત્રી ચ દધીચિદરદારિણી ॥ ૨૧૮॥

દધીચિભક્તિસુખિની દધીચિમુનિસેવિતા ।
દધીચિજ્ઞાનદાત્રી ચ દધીચિગુણદાયિની ॥ ૨૧૯॥

દધીચિકુલસમ્ભૂષા દધીચિભુક્તિમુક્તિદા ।

દધીચિકુલદેવી ચ દધીચિકુલદેવતા ॥ ૨૨૦॥

દધીચિકુલગમ્યા ચ દધીચિકુલપૂજિતા ।
દધીચિસુખદાત્રી ચ દધીચિદૈન્યહારિણી ॥ ૨૨૧॥

દધીચિદુઃખહન્ત્રી ચ દધીચિકુલસુન્દરી ।
દધીચિકુલસમ્ભૂતા દધીચિકુલપાલિની ॥ ૨૨૨॥

દધીચિદાનગમ્યા ચ દધીચિદાનમાનિની ।
દધીચિદાનસન્તુષ્ટા દધીચિદાનદેવતા ॥ ૨૨૩॥

દધીચિજયસમ્પ્રીતા દધીચિજપમાનસા ।
દધીચિજપપૂજાઢ્યા દધીચિજપમાલિન્કા ॥ ૨૨૪॥

દધીચિજપસન્તુષ્ટા દધીચિજપતોષિણી ।
દધીચિતપસારાધ્યા દધીચિશુભદાયિની ॥ ૨૨૫॥

દૂર્વા દૂર્વાદલશ્યામા દૂર્વાદલસમદ્યુતિઃ ।
નામ્નાં સહસ્રં દુર્ગાયા દાદીનામિતિ કીર્તિતમ્ ॥ ૨૨૬॥

યઃ પઠેત્ સાધકાધીશઃ સર્વસિદ્ધિર્લભેત્તુ સઃ ।
પ્રાતર્મધ્યાહ્નકાલે ચ સન્ધ્યાયાં નિયતઃ શુચિઃ ॥ ૨૨૭॥

તથાઽર્ધરાત્રસમયે સ મહેશ ઇવાપરઃ ।
શક્તિયુક્તો મહારાત્રૌ મહાવીરઃ પ્રપૂજયેત્ ॥ ૨૨૮॥

મહાદેવીં મકારાદ્યૈઃ પઞ્ચભિર્દ્રવ્યસત્તમૈઃ ।
યઃ સમ્પઠેત્ સ્તુતિમિમાં સ ચ સિદ્ધિસ્વરૂપધૃક્ ॥ ૨૨૯॥

દેવાલયે શ્મશાને ચ ગઙ્ગાતીરે નિજે ગૃહે ।
વારાઙ્ગનાગૃહે ચૈવ શ્રીગુરોઃ સન્નિધાવપિ ॥ ૨૩૦॥

પર્વતે પ્રાન્તરે ઘોરે સ્તોત્રમેતત્ સદા પઠેત્ ।
દુર્ગાનામસહસ્રં હિ દુર્ગાં પશ્યતિ ચક્ષુષા ॥ ૨૩૧॥

શતાવર્તનમેતસ્ય પુરશ્ચરણમુચ્યતે ।
સ્તુતિસારો નિગદિતઃ કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૨૩૨॥

॥ ઇતિ કુલાર્ણવતન્ત્રોક્તં દકારાદિદુર્ગાસહસ્રનામસ્તોત્રં સમાપ્તમ્ ॥

Encoded by Kirk Wortman kirkwort@hotmail.com

Proofread by Kirk Wortman and Ravin Bhalekar
Independently encoded by Adwaith Menon adwaithmenon at gmail.com

*Dakaradi Durga Sahasranama Stotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*